श्री अष्टलक्ष्मी मंत्रसिद्धि विधानं

आदौ श्रीरमानाथध्यानं

श्रीवत्सवक्षसं विष्णुं चक्रशंखसमन्वितं ।

वामोरुविलसल्लक्ष्म्याऽऽलिंगितं पीतवाससं ॥

सुस्थिरं दक्षिणं पादं वामपादं तु कुंजितं ।

दक्षिणं हस्तमभयं वामं चालिंगितश्रियं ॥

शिखिपीतांबरधरं हेमयज्ञोपवीतिनं ।

एवं ध्यायेद्रमानाथं पश्चात्पूजां समाचरेत् ॥

ऋषिः - छंदः - देवता - विनियोगः

अस्य श्रीअष्टलक्ष्मीमहामंत्रस्य - दक्षप्रजापतिः ऋषिः -

गायत्री छंदः - महालक्ष्मीर्देवता - श्रीं बीजं - ह्रीं शक्तिः -

नमः कीलकं - श्रीमहालक्ष्मीप्रसादेन अष्टैश्वर्यप्राप्तिद्वारा

मनोवाक्कायसिद्ध्यर्थे जपे विनियोगः ॥

करन्यासः

श्रीं ह्रीं श्रीं कमले श्रीं ह्रीं श्रीं अंगुष्टाभ्यां नमः ।

श्रीं ह्रीं श्रीं कमलालये श्रीं ह्रीं श्रीं तर्जनीभ्यां नम ॥

श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं मध्यमाभ्यां नमः ।

श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं अनामिकाभ्यां नमः ।

श्रीं ह्रीं श्रीं महालक्ष्म्यै श्रीं ह्रीं श्रीं कनिष्ठिकाभ्यां नमः ।

श्रीं ह्रीं श्रीं नमः श्रीं ह्रीं श्रीं करतलकरपृष्ठाभ्यां नमः ॥

हृदयादि न्यासः

श्रीं ह्रीं श्रीं कमले श्रीं ह्रीं श्रीं हृदयाय नमः ।

श्रीं ह्रीं श्रीं कमलालये श्रीं ह्रीं श्रीं शिरसे स्वाहा ।

श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं शिखायै वषट् ।

श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं कवचाय हुं ।

श्रीं ह्रीं श्रीं महालक्ष्म्यै श्रीं ह्रीं श्रीं नेत्रत्रयाय वौषट् ।

श्रीं ह्रीं श्रीं नमः श्रीं ह्रीं श्रीं अस्त्राय फट् ।

भूर्भुवस्सुवरोमिति दिग्बंधः ॥

ध्यानं -

वंदे लक्ष्मीं वरशशिमयीं शुद्धजांबूनदाभां
तेजोरूपां कनकवसनां सर्वभूषोज्ज्वलांगीं ।
बीजापूरं कनककलशं हेमपद्मे दधानां
आद्यां शक्तिं सकलजननीं विष्णुवामांकसंस्थां ॥

पूजा

ॐ श्रीं ह्रीं क्लीं ऐं सौः जगत्प्रसूत्यै महालक्ष्म्यै ॐ -
लं पृथ्वीतत्त्वात्मकं गंधं समर्पयामि नमः ।
ॐ श्रीं ह्रीं क्लीं ऐं सौः जगत्प्रसूत्यै महालक्ष्म्यै ॐ -
हं आकाशतत्त्वात्मकं पुष्पं समर्पयामि नमः ।
ॐ श्रीं ह्रीं क्लीं ऐं सौः जगत्प्रसूत्यै महालक्ष्म्यै ॐ -
यं वायुतत्त्वात्मकं धूपमाघ्रापयामि नमः ।
ॐ श्रीं ह्रीं क्लीं ऐं सौः जगत्प्रसूत्यै महालक्ष्म्यै ॐ -
रं वह्नितत्त्वात्मकं दीपं दर्शयामि नमः ।
ॐ श्रीं ह्रीं क्लीं ऐं सौः जगत्प्रसूत्यै महालक्ष्म्यै ॐ -
वं अमृततत्त्वात्मकं नैवेद्यं समर्पयामि नमः ।
ॐ श्रीं ह्रीं क्लीं ऐं सौः जगत्प्रसूत्यै महालक्ष्म्यै ॐ -
सं सर्वतत्त्वात्मकं सर्वोपचारपूजां समर्पयामि नमः ।

अष्टनामार्चना

ॐ आदिलक्ष्म्यै नमः । ॐ संतानलक्ष्म्यै नमः ।
ॐ गजलक्ष्म्यै नमः । ॐ धनलक्ष्म्यै नमः ।
ॐ धान्यलक्ष्म्यै नमः । ॐ विजयलक्ष्म्यै नमः ।
ॐ वीरलक्ष्म्यै नमः । ॐ ऐश्वर्यलक्ष्म्यै नमः ।

षोडश मातृकार्चना

अं कामाकर्षिण्यै नमः । आं बुद्ध्याकर्षिण्यै नमः ।
इं अहंकाराकर्षिण्यै नमः । ईं शब्दाकर्षिण्यै नमः ।
उं स्पर्शाकर्षिण्यै नमः । ऊं रूपाकर्षिण्यै नमः ।
ऋं रसाकर्षिण्यै नमः । ॠं गंधाकर्षिण्यै नमः ।
ऌं चित्ताकर्षिण्यै नमः । ॡं धैर्याकर्षिण्यै नमः ।

एं स्मृत्याकर्षिण्ये नमः । ऐं नामाकर्षिण्ये नमः ।
ॐ बीजाकर्षिण्ये नमः । औं आत्माकर्षिण्ये नमः ।
अं अमृताकर्षिण्ये नमः । अः शरीराकर्षिण्यै नमः ।
कुंभादि कुंभगोप्त्री त्वं गृहाणास्मत्कृतं जपं ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्मयि स्थिरा ॥

जपप्रकारं
गुरु प्रार्थना - ॐ नमः श्रीगुरुदेवाय परमपुरुषाय नमः ।
अष्टैश्वर्यलक्ष्मी देवताः ।
वशीकराय सर्वारिष्टविनाशनाय त्रैलोक्यवशायै स्वाहा ॥

मूलमंत्रं ।
1 ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद
श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः ।
2 ॐ श्रीं ह्रीं क्लीं ऐं सौः जगत्प्रसूत्यै स्वाहा ।
3 ॐ श्रीं ह्रीं ऐं महालक्ष्म्यै कमलधारिण्ये सिम्हवाहिन्यै स्वाहा ।
वैदिकमंत्रं
महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥

महालक्ष्मि नमस्तुभ्यं नमस्तुभ्यं सुरेश्वरि ।
हरिप्रिये नमस्तुभ्यं नमस्तुभ्यं दयानिधे ॥

पद्मासने पद्मकरे सर्वलोकैकपूजिते ।
सान्निध्यं कुरु मे चित्ते विष्णुवक्षस्थलालये ॥

भगवद्दक्षिणे पार्श्वे ध्यायेच्छ्रियमवस्थितां ।
ईश्वरीं सर्वभूतानां जननीं सर्वदेहिनां ॥

इति श्रीअष्टलक्ष्मीमंत्रसिद्धिविधानं संपूर्णं ।